# Shakyasimha Stotram

# शाक्यसिंहस्तोत्रम् २

## Document Information

Text title : Shakyasimha Stotram

File name : shAkyasiMhastotram2.itx

Category : misc, buddha, stotra

Location : doc_z_misc_general

Transliterated by : DSBC staff

Proofread by : Miroj Shakya

Acknowledge-Permission: Prof. Miroj Shakya, Text Nagarjuna Institute of Exact Methods,

Digital Sanskrit Buddhist Canon Project, University of the West https://www.dsbcproject.org/

Latest update : March 8, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 8, 2025

*sanskritdocuments.org*

# शाक्यसिंहस्तोत्रम् २

नमामि तं भिक्षुगणैरूपेतं तथागतैर्वृक्षतले निषण्णम् ।
अनन्तरोदीरितलक्ष्मभाजौ पादौ यदीयावुपजातयस्ताः ॥ १॥

शाक्येन्द्रवंशाललितावतंसमंशाधिकाभं कनकाधिकाभम् ।
नमामि बुद्धं ह्युपजातिसिद्धं सर्वार्थसिद्धाख्यकुमारवर्यम् ॥ २॥

नमामि नित्यं निरवद्यवृत्तं निरञ्जनं निर्मलदेहरूपम् ।
निःशेषसत्त्वोद्धरणैकचित्तं चन्द्राननं शुभ्रपदारविन्दम् ॥ ३॥

शौद्धोदनिं गौतमिपालनीयं मायासुतं मारजितं महान्तम् ।
महेश्वराद्यैर्महनीयमूर्तिममेयमाहात्म्यममेयधर्मम् ॥ ४॥

भवोदधेस्तीर्णमनन्तपुण्यं भवादिदेवैरभिवन्द्यपादम् ।
अनन्तभव्याकृतिभावनीयं तं नौमि भव्योज्ज्वलभूषिताङ्गम् ॥ ५॥

बभाण वंशस्थविरो नृपाधिपो जनान् प्रतीत्याह्वयतात्मजं मम ।
कृतारिभङ्गं जिनराजमीश्वरं गतं षडब्दं च वियोगभावयोः ॥ ६॥

भजस्व वंशस्थविरं मुनीश्वरं महावने वृक्षतले शुचिस्थले ।
जगद्धितं यज्जनन जरान्तकं जगज्जनन्या वरदक्षपार्श्वजम् ॥ ७॥

शाक्येन्द्रवंशोदधिचन्द्रमुद्गतं श्रीशाक्यसिंहं चतुराननैः स्तुवन् ।
प्राशिष्ट ब्रह्मा चतुराननं स्वकं चतुर्गुणं पुण्यमवाप्तमित्यहो ॥ ८॥

दैत्येन्द्रवंशाग्निरसौ जनार्दनो द्वाभ्यां विधायाञ्जलिमम्बुजासनम् ।
दोष्णाममंसचतुरश्चतुर्भुजाद् द्वैगुण्यमाप्तं सुकृतं मयेति ॥ ९॥

इति छन्दोऽमृतोद्धृतं श्रीशाक्यसिंहस्तोत्रं सम्पूर्णम् ॥

*Shakyasimha Stotram*

pdf was typeset on March 8, 2025

Please send corrections to *sanskrit@cheerful.com*